National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(64): 121-122
© 2026 NJHSR
www.sanskritarticle.com

**राकेशपरिडा**
शौधच्छात्रः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**राकेशपरिडा**
शौधच्छात्रः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# श्रीतुलसीमहाकाव्ये धर्मशास्त्रवैज्ञानिकांशाः

**राकेशपरिडा**

अनेकानि धर्मशास्त्राणि संस्कृतवाङ्मये दरीदृश्यन्ते। तेष्वेव धर्मशास्त्रेषु वेदः अन्यतमः भवति। वेदाननुसृत्य धर्मशास्त्रमिदं प्रवर्तते। अस्मादुच्यते मनुस्मृतौ मनुना– **"वेदोऽखिलधर्ममूलम्"**।[1] धर्मशास्त्रग्रन्थेष्वपि नैके विषयाः समभिलक्ष्यन्ते। तेष्वेव संदृश्यमाणेषु विषयेषु वैज्ञानिकविषयः प्रमुखस्थानमासादयति। धर्मशास्त्रग्रन्थेषु यद्यपि वैज्ञानिकविषयाः संदृश्यन्ते, तथापि तदीतरशास्त्रग्रन्थेष्वपि धर्मशास्त्रवैज्ञानिकांशाः सुतरामेव समवलोक्यन्ते। सम्प्रति तुलसीमहाकाव्ये धर्मशास्त्रवैज्ञानिकांशाः इत्यस्मिन् विषये किञ्चिदालोच्यते।

**१.अस्त्रविज्ञानम् –**

साम्प्रतिककाले अस्त्रविज्ञानस्यापि प्रयोगः दरीदृश्यते। किञ्च ये वैज्ञानिकाः तेषामस्त्राणां निर्माण-प्रयोगञ्च कूर्वते, ते अवश्यमेव इत्थं जानूयुर्यत्– एतेषामस्त्राणां निर्माणेन, प्रयोगेणापि जगदीदं ध्वंसाभिमुखं प्रत्येति। केचिदणुद्वारा वमास्त्रं निर्मान्ति, अमुना वमाभिधानेन अस्त्रेण प्रलयः आयाति संसारोऽपि सम्पूर्णमेव एकदा नश्यति। अतः तुलसीमहाकाव्ये उद्यते यथा –

**"वैज्ञानिकः कोऽपि जगत्समस्तं**
**क्षणेन विध्वंसयितुं चकार।**
**वमाह्वयास्त्राण्यणुनिर्मितानि**
**येषां प्रयोगः प्रलयं करोति"॥**[2]

**२. युद्धविज्ञानम् –**

युद्धविज्ञानस्य विषये अस्माकं धर्मशास्त्रपुराणेतिहासग्रन्थेषु नैके विषयाः परिलक्ष्यन्ते। तत्र तैतरीयोपनिषदि शिक्षावल्ल्यां कथ्यते यत्– **"सत्यं वद, धर्मं चर, स्वाध्यायान्न प्रमदितव्यं, कुशलान्न प्रमदितव्यं , यानि अनवद्यानि कर्माणि तानि नोपसेवितव्यानि, यान्येव वद्यानि तान्येव सेवितव्यानि, नेतराणि"**।[3] किन्तु वर्तमानयुगे सर्वे धर्मशास्त्रविरुद्धकार्याणि कर्त्तुमिच्छन्ति, येन सर्वत्रैव विश्वे युद्धान्येव जाजायन्ते, अनैतिकानि एव संघटन्ते। अतः अनैतिककार्याद्वारयितुं धर्मशास्त्रोक्तनियमः सुतरामेवाचरणनीयः, यदीत्थं पालयन्ति, तर्हि विश्वशान्तिः सुतरामेव सम्भवति। अस्मादुच्यते तुलसीमहाकाव्ये–

**"अनैतिके कर्मणि दत्तचित्ताः**
**नान्यायतो विभ्यति केऽपि लोकाः।**
**तस्यैव हेतोरधुना धरण्यां**
**युद्धं प्रवृद्धं प्रलयं विधित्सुः"॥**[4]

**३. अणुब्रतम् –**

अणुब्रतपदेन सामान्यतः अंहिसायाः ग्रहणं भवति। धर्मशास्त्रे तावदहिंसायाः स्थानं सर्वोत्कृष्टं भवति। महाभारते तावदुच्यते –

**"अहिंसा परमो धर्मः"॥**[5]

अहिंसा तादृश्यस्त्रस्वरूपा भवति, येनास्त्रेण सर्वं जगत्करायत्तं कर्त्तुं शक्यते। ये अणुव्रतमाचरन्ति, ते कदापि अन्यायं नैवाचरन्ति, नवा तेषां मनः अन्याये निमज्जति, सर्वदा न्यायमार्गेण सर्वं द्रव्यं, सर्वं पदार्थं साधयितुमभिलसन्ति, कदापि ते अन्यायमार्गव्रतमाश्रयन्ति। अतः निगद्यते –

**"दुग्धे घृते भक्ष्यविशेषके वा**

**तथौषधादौ परहेयवस्तु।**

**न मिश्रयिष्यन्ति धनार्जनाय**

**कृतप्रणाः सम्यगणुव्रतानाम्"॥**[6]

**४.समविज्ञानभावना –**

धर्मशास्त्रे विशिष्य श्रीमद्भगवद्गीतायां तावद्दृश्यते यत्– यः स्थितप्रज्ञः भवति सः च सर्वदा समत्वभावमाचरति। तस्य कोऽपि निन्दां करोतु, उत प्रशंसां, दुःखं प्रयच्छतु, अथवा सातम्, कोऽपि सम्मानयतु अथवा अपमानयतु, कोऽपि पुष्पवृष्टिं कारयतु, उत रजोवृष्टिम्, सर्वत्र समानभावना तज्जनस्य संलक्ष्यते। अतः उच्यते भगवद्गीतायाम् –

**"सुखेष्वनुद्विग्नमनाः दुःखेषु विगतस्पृहः।**

**वितरागभयक्रोधरेतर्हि मुनिरुच्यते"॥**[7]

तुलसीचरितमहाकाव्ये एतस्य वर्णना सुतरामेव संदृश्यते। यथा –

**"स्तुतिं स्वकीयां कुसुमैः सुदृक्षां**

**निन्दां निजां प्रस्तरसन्निभां वा।**

**अमन्यमानो न सुखी न दुःखी**

**मानापमानेषु समश्चचाल"॥**[8]

**५. योगविज्ञानम् –**

धर्मशास्त्रे चत्वारः आश्रमास्सन्ति। तेष्वेव आश्रमेषु सन्यासाश्रमः प्रमुखः भवति। सन्यास्याश्रमे सन्यासी सर्वं त्यक्त्वा संसारबन्धमरण्ये निवसति, सः स्त्रीपुत्रमातापितादीन् सर्वान् विहाय केवलं धर्माय कानने निवसति, तत्र अरण्ये यद्यपि वृक्षपत्रपुष्पफललतादयः सन्ति, तथापि तेभ्यः सर्वेभ्यः विमुक्तस्सन्, निर्विकारत्वेन वैराग्यपूर्णजीवनं व्यतीयापयति, पर्यटति च। यतो हि धर्ममर्जयितुं ये वाञ्छन्ति, ते शीतोष्णादिसर्वं द्वन्द्वं सहन्ते, शरीरमपि क्षीणं कारयन्ति। अपि च ते योगिनः जानन्ति यत् - इदमेव शरीरं केवलं धर्मसाधनाय एव, न तु भैतिकसुखाय इति। तस्मादुच्यते कालिदासेन कुमारसम्भवे–

**"शरीरमाद्यं खलु धर्मसाधनम्"॥**[9]

तुलसीमहाकाव्येऽस्मिन् इत्थमभाणि कविना रघुनन्दनशर्मणा –

**"लतावितानैः रहितेषु तत्र**

**योगिष्विव स्त्रीसुतवर्जितेषु।**

**शमीकरीरादिवहुद्रुमेषु**

**प्रपर्यटन् धर्मभृतामधीशः"॥**[10]

**६. आत्मविज्ञानम् –**

आत्मना साकं यस्य विज्ञानस्य सम्बद्धोऽस्ति तदेव आत्म-विज्ञानमितीर्य्यते। अत्र आत्मना साकं शरीरस्य, मनसः, मस्ति-ष्कस्य, बुद्धेः, षड्रीपुणाम्, अङ्गानाञ्च नितरामेव सम्बद्धः विद्यते। यदि शरीरे आत्मा स्यात्तर्हि शरीरमिदं चेतनमिति ब्रूमः। यदि शरीरे आत्मा नैव भूयात्तदेवाचेतनमिति भणामः। यदा शरीरे आत्मा भवति तदा इदं शरीरं शिवतुल्यं भवतु, यदा शरीरादात्मा निर्गच्छति तदा तच्छरीरं शवरित्यपि कथयामः। अतः आत्माशरीरयोर्मध्ये शिवशवसम्बन्धः वर्त्तते, इदमेव आत्मिकविज्ञानमथवा शारीरिक-विज्ञानमथवा योगविज्ञानमित्युच्यते। तुलसीचरितमहाकाव्ये कवि-रघुनन्दनशर्मा आत्माविज्ञानविषये आह यत्– सर्वे जनाः तादृशमेवाणुव्रतं मानसे धारणमकार्षुः येनाणुव्रतेन तेषामात्मा परिशुद्धोऽभूत्, धनान्येव तृणसमानानि जनाः व्यचिन्तयन्। अतः अहिंसास्वरूपस्य मोक्षधर्मस्य समीपे धनस्वरूपभौतिकधर्मरत्यन्तं तुच्छ एवासीत्। यथोक्तम् –

**"अणुव्रतानि मानवाः नवानि मानसे दधुः।**

**व्यधुः स्वकीयशोधनं, धनं तृणाय मेनिरे"॥**[11]

अतः यदि सम्पूर्णमेव तुलसीमहाकाव्यमालोचयामः, तदा ज्ञातुं शक्यते यदत्र धर्मशास्त्रसम्बद्धाः नैके वैज्ञानिकांशाः महाकाव्येऽस्मिन् परिलक्ष्यन्ते।

**<u>सहायकग्रन्थसूचिः</u>**


१. श्रीतुलसीमहाकाव्यम्, आदर्श साहित्य संघ, चूरू,, राजस्थान,, १९६२

२. मनुस्मृतिः व्या. झा, गङ्गान्नाथ, परिमल, पब्लिकेशन, दिल्लि-२००४

३. तैतिरीयोपनिषद्,जोशी,कन्हेयालल, चौखम्भा पब्लिशर्स,२००९

४. महाभातम्, सं,सातवलेकर, दामोदर, स्वोध्याय मण्डल, पार्डी, १९७२

५. श्रीमद्भगवत्गीता, गीताप्रेस गोरखपुर, सं. २०४३

६. कुमारसम्भवम्, डा. गङ्गा सहाय 'प्रेमी' एवं अजय गोयल.


**संदर्भ**

1. मनुस्मृतिः– 2/6
2. श्रीतुलसीमहाकाव्यम्– 16/31
3. तैतिरीयोपनिषद् शिक्षावल्ली, अनुवाक् 11 मन्त्रः-1
4. श्रीतुलसीमहाकाव्यम्– 16/29
5. महाभातम् अरण्यपर्व– 3.211.15
6. श्रीतुलसीमहाकाव्यम्– 16/36
7. श्रीमद्भगवत्गीता– 2/56
8. श्रीतुलसीमहाकाव्यम्– 14/33
9. कुमारसम्भवम्– 5/33
10. श्रीतुलसीमहाकाव्यम्– 14/24
11. श्रीतुलसीमहाकाव्यम्– 14/32